॥ अपोह्लानुभव ॥

१
अप्रो० ॐ श्रीहरये नमः॥ श्रीहरिं परमानंदमुपदेष्टारमीश्वरं व्यापकं सर्वलोकानां कारणं तं नमाम्यहं
अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये सद्भिरेव प्रयत्नेन वीक्षणीया मुहुर्मुहुः २ स्ववर्णा
श्रमधर्मेण तपसा हरितोषणात् साधनं प्रभवेत्पुंसां वैराग्यादि चतुष्टयं ३ ब्रह्मादिस्थावरांतेषु
वैराग्यं विषयेष्वनु यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलं ४ नित्यमात्मस्वरूपं हि दृश्यं तद्वि
परीतगं एवं यो निश्चयः सम्यग्विवेको वस्तुनः स वै ५ सदैव वासनात्यागः शमोयमिति शब्दितः
निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ६ विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा सहनं सर्वदुः
खानां तितिक्षा सा शुभा मता ७ निगमाचार्यवाक्येषु भक्तिः श्रद्धेति विश्रुता चित्तैकाग्र्यं तु
सल्लक्ष्ये समाधानमिति स्मृतं ८ संसारबंधनिर्मुक्तिः कथं स्यान्मे कदा विधे इति या सुदृढा बुद्धि
र्वक्तव्या सा मुमुक्षुता ९ उक्तसाधनयुक्तेन विचारः पुरुषेण हि कर्तव्यो ज्ञानसिद्ध्यर्थमात्म वे०
साधने नः शुभमिच्छता १० नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः यथा पदार्थभानं हि प्रकाशेन विना क्वचित्
१

२ प्रो० ते नयोरैक्यं प्रपश्यंति किमज्ञानमतःपरं २१ आत्मानित्योहिसद्रूपो देहोनित्योह्यसन्मयः त
योरैक्यं प्रपश्यंति किमज्ञानमतःपरं २२ आत्मनःतत्प्रकाशत्वं यत्पदार्थावभासनं नाग्न्यादि
दीप्तिमेवत्त्वं धयत्तोनिशि २३ देहोहमित्ययं मूढो धृत्वा तिष्ठत्यहोजनो ममायमिति विज्ञात्वात्मा
घटद्रष्टेव सर्वदा २४ ब्रह्मैवाहं त्रिगुणरहितं पंचपापो ब्रह्मैवाहं समःशांतः सच्चिदानंदलक्ष
णः नाहं देहोह्यसद्रूपो ज्ञानमित्युच्यते बुधैः २५ निर्विकारो निराकारो निरवद्योहमव्य
यः नाहं देहोह्यसद्रूपो ज्ञानमित्युच्यते बुधैः २६ निरामयो निराभासो निर्विकल्पःसनात
नः नाहं देहोह्यसद्रूपो ज्ञानमित्युच्यते बुधैः २६ निर्गुणो निष्क्रियो नित्यो नित्यमुक्तोहमच्यु
च्युतः नाहं देहोह्यसद्रूपो ज्ञानमित्युच्यते बुधैः २७ निर्मलो निश्चलोनंतः शुद्धोहमजरा
मरः नाहं देहोह्यसद्रूपो ज्ञानमित्युच्यते बुधैः २८ स्वदेहंशोभनंत्यक्त्वा पुरुषाख्यं च सम्म
त किंमूर्खशून्यमात्मानं देहातीतं करोषि भो २९ स्वात्मानं शृणु मूर्ख त्वं श्रुत्या युक्त्या श्रुत्या श्रो० २

११ योन उपजे विचार बिन ज्ञान साधन कोटि करे जो ज्ञान घटपटादि पदार्थ जैसे सुर प्रकाश
बिन दीप दि कैसे १२ इति वैराग्यादि चतुष्टय प्रथम प्रकरणं कोऽहं कथमिदं जातं को वै कर्त्ता वि
द्यते उपादानं किमस्तीह विचारः सोऽयमीदृशः १३ नाहं देहो ह्यसद्रूपो नाहं भूतगणो देहो नाहं चा
क्षगणस्तथा एतद्विलक्षणः कश्चिद्विचारः सोऽयमीदृशः १४ अज्ञानप्रभवं सर्वं ज्ञानेन प्रविली
यते संकल्पो विविधः कर्त्ता विचारः सोऽयमीदृशः १५ एतयोर्यदुपादानमेकं सूक्ष्मं सदव्ययं यथैव
मृद् घटादीनां विचारः सोऽयमीदृशः १६ तदहं नात्र संदेहो विचारः सोऽयमीदृशः अहमेकोऽपि सू
क्ष्मश्च ज्ञाता साक्षी सदव्ययः १७ इति विचार पंचकः द्वितीय प्रकरणं आत्मा वै निष्कलो ह्येको
देहो बहुभिरावृतः तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परं आत्मा नियामकश्चान्त देहो नियम्यवा
ह्यकः तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परं १९ आत्मा ज्ञानमयः पुण्यो देहो मांसमयो
ऽशुचिः तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परं २० आत्मप्रकाशकः स्वच्छो देहस्तामस उच्य

मुच्यते ४२

पुरुषार्थता ४१ इत्यादिभेदं तु देहात्मत्वं निवारितुं इदानीं जीवभेदस्याप्यसत्वं स्फुटं चैतन्यस्यैकरूपत्वाद्भेदो युक्तो न क
र्हिचित् जीवत्वं च मृषा ज्ञेयं रज्जौ सर्पग्रहो यथा ४३ रज्ज्वज्ञानात् क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी भाति तद्व
च्चितिः साक्षाद्विश्वाकारेण केवला ४४ उपादानं प्रपंचस्य ब्रह्मणोन्यन्न विद्यते तस्मात्सर्वः प्रपंचोयं
ब्रह्मैवास्ति न चेतरत् ४५ व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात् इति ज्ञाते परे तत्त्वे भेदस्यावस
रः कुतः ४६ श्रुत्या निवारितं नूनं नानात्वं स्वमुखेन हि कथं भासो भवेदन्यः स्थिते चाद्वयकारणे ४७ दो
षोपि विहितः श्रुत्या मृत्योर्मृत्युं स गच्छति इह पश्यति नानात्वं मायया वंचितो नरः ४८ ब्रह्मणः सर्वभूता
नि जायंते परमात्मनः तस्मादेतानि ब्रह्मैव भवंतीत्यवधारयेत् ४९ ब्रह्मैव सर्वनामानि रूपाणि विवि
धानि च कर्माण्यपि समग्राणि बिभर्तीति श्रुतिर्जगौ ५० सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतं
ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत् ५१ स्वल्पमप्यंतरं कृत्वा जीवात्मपरमात्मनोः यः पश्य
ति मूढात्मा भयं तस्याभिभाषितं ५२ यदज्ञानाद्भवेद्द्वैतमितरस्तत्र पश्यति आत्मत्वेन यदा सर्वं नेत ५३

च पुरुषं देहातीतं निराकारं सुदुर्दर्शं भवाहृषे ॥ ३० अहं प्रादेशविख्यातो एक एव स्थितः परः । स्थूलस्त्व
नेकतां प्राप्तः कथं स्याद्देहकः पुमान् ॥ ३१ अहं द्रष्टृतया सिद्धो देहो दृश्यतया स्थितः । ममायमिति निर्देशा
त्कथं स्याद्देहकः पुमान् ॥ ३२ अहं विकारहीनस्तु देहो नित्यविकारवान् । इति प्रतीयते साक्षात्कथं स्याद्देहकः
पुमान् ॥ ३३ यस्मात्परमिति श्रुत्या तया पुरुषलक्षणं । विनिर्णीतं विमूढेन कथं स्याद्देहकः पुमान् ॥ ३४ सर्वं
पुरुष एवेति सूक्ते पुरुषसंज्ञिते । अप्युच्यते यतः श्रुत्या कथं स्याद्देहकः पुमान् ॥ ३५ असंगः पुरुषः प्रो
क्तो बृहदारण्यकेपि च । अनंतमलसंश्लिष्टः कथं स्याद्देहकः पुमान् ॥ ३६ तत्रैव च समाख्यातः स्वयं
ज्योतिर्हि पूरुषः । जडः परप्रकाश्योयं कथं स्याद्देहकः पुमान् ॥ ३७ प्रोक्तोपि कर्मकाण्डेन ह्यात्मा देह
द्विलक्षणः । नित्यश्च यत्फलं भुंक्ते देहपातादनंतरं ॥ ३८ लिंगं चानेकसंयुक्तं चलं दृश्यं विकारि च
अव्यापकमसद्रूपं तत्कथं स्यात्पुमानयं ॥ ३९ एवं देहद्वयादन्य आत्मा पुरुष ईश्वरः । सर्वात्मा स
र्वरूपश्च सर्वातीतोहमव्ययः ॥ ४० इत्यात्मदेहभेदेन हि प्रपंचस्यैव सत्यता यथोक्ता तर्कशास्त्रेण ततः किं

प्रा० क्रियते जनैः अज्ञानाद्विज्ञानं तिमिरे देवि हि यत्तादिकं ६५ कार्यकारणतानित्यमास्ते घटमृदोर्यथा
तथैव श्रुतियुक्तिभ्यां प्रपञ्चब्रह्मणोरिह ६६ गृह्यमाणे घटे यद्वन्मृत्तिकाभातिवैबलात् वीक्ष्यमाणे प्र
पञ्चेऽपि ब्रह्मैवभाति भास्वरं ६७ सदैवात्मा विशुद्धोऽस्ति ह्यशुद्धो भाति वै सदा यथैव द्विविधा रज्जुर्ज्ञानि
4 नोऽज्ञानिनोऽनिशं ६८ तथैव मृन्मयः कुम्भस्तद्वद्देहोऽपि चिन्मयः आत्मानात्मविभागोऽयं मिथ्यैव क्रि
यते बुधैः ६९ सर्पत्वेन यथा रज्जुरजतत्वेन शुक्तिका विनिर्णीता विमूढेन देहत्वेन तथात्मता ७०
घटत्वेन यथा पृथ्वी पटत्वेनैव तन्तवः विनिर्णीता विमूढेन देहत्वेन तथात्मता ७१ कनकं कुण्डल
त्वेन तरङ्गत्वेन वै जलं विनिर्णीता विमूढेन देहत्वेन तथात्मता ७२ पुरुषत्वेन यथा स्थाणुर्ज
लत्वेन मरीचिका विनिर्णीता विमूढेन देहत्वेन तथात्मता ७३ गृहत्वेनैव काष्ठानि खड्गत्वेनैव लो
हता विनिर्णीता विमूढेन देहत्वेन तथात्मता ७४ इति स्वरूपनिश्चयप्रकरणं यथा वृक्षविपर्या
सो जलाद्भवति कस्यचित् तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ७५ पोतेन गच्छतः पुंसः सर्व

रस्तत्रचारवत् ५३ यस्मिन्सर्वाणि भूतानि ह्यात्मत्वेन विजानतः नैव तस्य भवेन्मोहो न च शोको द्वि-
तीयकः ५४ अयमात्मा हि ब्रह्मैव सर्वात्मकतया स्थितः इति निर्धारितं श्रुत्या बृहदारण्यसंस्थया ५५
अनुभूतोप्ययं लोको व्यवहारक्षमोपि सन् असद्रूपो यथा स्वप्न उत्तरक्षणबाधतः ५६ स्वप्नो जागरणेली-
कः स्वप्नेपि जागरो नहि द्वयमेव लयेनास्ति लयोपि ह्युभयोर्न च ५७ एवं सर्वं भवेन्मिथ्या गुणत्रयविनि-
र्मितं अस्य द्रष्टा गुणातीतो नित्यो ह्येकश्चिदात्मकः ५८ यद्वन्मृदि घटो नाम कनके कुंडलाभिधा शुक्तौ
हि रजतख्यातिर्जीवशब्दस्तथा परे ५९ यद्वन्मरुद घटं भातिः शुक्तौ वा रजतस्थितिः तद्वद्ब्रह्मणि जीवत्वं
वीक्ष्यमाणे न नश्यति ६० यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदा-
त्मनि ६१ यथैव शून्ये वेतालो गंधर्वाणां पुरं यथा यथाकाशे द्विचंद्रत्वं तद्वत्सत्ये जगत्स्थितिः ६२
यथा तरंगकल्लोलैर्जलमेव स्फुरत्यलं पात्ररूपेण ताम्रं हि ब्रह्मांडौघैस्तथात्मता ६३ घटनाम्ना यथा
पृथ्वी पटनाम्ना हि तंतवः जगन्नाम्ना चिदाभाति ज्ञेयं तत्तदभावतः ६४ सर्वोपि व्यवहारस्तु ब्रह्मणा

प्रो ध्यासो हि जायते सद्य आत्मापरिज्ञानात् लीयते च परात्मनि ८७ उत्तिष्ठ विद्यात्मदेहाध्यासे हतो यो
२ प्रकारेण। सर्वमात्मतया ज्ञातं जगत् स्थावरजंगमं अभावात्सर्वभावानां देहतावात्मता कुतः ८८
आत्मानं सततं ज्ञात्वा कालं नय महाद्युते प्रारब्धमखिलं भुंजन्नोद्वेगं कर्तुमर्हसि ८९ उत्पन्ने
प्यात्मविज्ञाने प्रारब्धं नैव मुच्यते इति यत् श्रूयते शास्त्रात् तन्निराक्रियतेऽधुना ९० तत्त्वज्ञानो
दयादूर्ध्वं प्रारब्धं नैव विद्यते देहादीनामसत्त्वात्तु यथा स्वप्नविबोधितः ९१ कर्म जन्मान्तरीयं यत् प्रा
रब्धमिति कीर्तितं तत्तु जन्मान्तराभावात् पुंसो नैवास्ति कर्हिचित् ९२ स्वप्नदेहो यथाध्यस्त
स्तथैवायं हि देहकः अध्यस्तस्य कुतो जन्म जन्माभावे स्थितिः कुतः ९३ उपादानं प्रपंचस्य ब्रह्मणो
न्यन्न विद्यते अज्ञानं चेति वेदान्तैस्तस्मिन्नष्टे क्व विश्वता ९४ यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्र
मात् तद्वत्सत्यमविज्ञाय जगत्पश्यति मूढधीः ९५ रज्जुरूपे परिज्ञाते सर्पखण्डं न तिष्ठति अ
धिष्ठाने तथा ज्ञाते प्रपंचः शून्यतां गतः ९६ देहस्यापि प्रपंचत्वात् प्रारब्धस्यास्थितिः कुतः अज्ञा

भातीव चंचलं तद्वदात्मनि देहस्त्वं पश्यस्व ज्ञानयोगतः ७६ पीतत्वं हि यथा शुभ्रे दोषाद्भवति कस्य
चित् तद्वदात्मनि जीवत्वं पश्यस्व ज्ञानयोगतः ७७ चक्षुर्भ्यां भ्रमशीलाभ्यां सर्वं भाति भ्रमात्मकं
तद्वदात्मनि देहस्त्वं पश्यस्व ज्ञानयोगतः ७८ ज्वलातुं भ्रमणेनैव वर्त्तुलं भाति सूर्यवत् तद्वदात्म
नि देहस्त्वं पश्यस्व ज्ञानयोगतः ७९ महत्त्वे सर्ववस्तूनामणुत्वं ह्यतिदूरतः तद्वदात्मनि देहस्त्वं
पश्यस्व ज्ञानयोगतः ८० सूक्ष्मत्वे सर्ववस्तूनां स्थूलत्वं चोपनेत्रतः तद्वदात्मनि देहस्त्वं पश्यस्व ज्ञा
नयोगतः ८१ काचभूमौ जलत्वं वा जलभूमौ च काचता तद्वदात्मनि देहस्त्वं पश्यस्व ज्ञानयोग
तः ८२ यद्वदग्नौ मणित्वं हि मणौ वा वह्निता पुमान् तद्वदात्मनि देहस्त्वं पश्यस्व ज्ञानयोगतः ८३
यथैव दिग्विपर्यासो मोहाद्भवति कस्यचित् तद्वदात्मनि देहस्त्वं पश्यस्व ज्ञानयोगतः ८४ अभ्रे
त् शुभ्रत्सु यथा वै सुप्तो मोघा वसति भातिवै तद्वदात्मनि देहस्त्वं पश्यस्व ज्ञानयोगतः ८५ यथा ... सर्वा
भाति चंचलं स्वेनकस्यचित् तद्वदात्मनि देहत्वं पश्यस्व ज्ञानयोगतः ८६ एवमात्मन्यविद्यातो देहा

६

प्रो० धैः १०७ वाचो यस्मान्निवर्त्तंते तद्वक्तुं केन शक्यते प्रपंचो यदि वक्तव्यः सोपि शब्दविवर्जितः १०८
इति वै तद्भवेन्मौनं सतां सहजसंज्ञितं गिरा मौनं तु बालानां प्रयुक्तं ब्रह्मवादिभिः १०९ आदावंते
च मध्ये च जनो यस्मिन्न विद्यते येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ११० कलनात्सर्वभूता
6 नां ब्रह्मादीनां निमेषतः कालशब्देन निर्दिष्टो ह्यखंडानंद अद्वयः १११ सुखेनैव भवेद्यस्मिन्न
जस्रं ब्रह्मचिंतनं आसनं तद्विजानीयान्नेतरत्सुखनाशनं ११२ सिद्धं यत्सर्वभूतादि विश्वाधिष्ठा
नमव्ययं यस्मिन्सिद्धाः समाविष्टास्तद्वै सिद्धासनं भवेत् ११३ यन्मूलं सर्वलोकानां यन्मूलं चि
त्तबंधनं मूलबंधः सदा सेव्यो योग्योसौ राजयोगिनां ११४ अंगानां समतां विद्यात्समे ब्रह्मणि ली
यते नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ११५ दृष्टिं ज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत्
सा दृष्टिः परमोदारा न नासाग्रावलोकिनी ११६ द्रष्टृदर्शनदृश्यानां विरामो यत्र वा भवेत् दृष्टिस्तत्रै
व कर्तव्या न नासाग्रावलोकिनी ११७ चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् निरोधः सर्व

६

न जनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः ९७ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे बहुत्वं तन्निषे
धार्थं श्रुत्या गीतं च यत्स्फुटं ९८ उच्यतेज्ञैर्बलादेतत्तदानर्थद्वयागमः वेदांतमतहानं च यतो ज्ञा
नमिति श्रुतिः ९९ इति प्रारब्धस्यैकादशप्रकरणं त्रिपंचांगान्यथो वक्ष्ये पूर्वोक्तस्य हि लब्धये
तैश्च सर्वैः सदा कार्यं निदिध्यासनमेव तु १०० नित्याभ्यासादृते प्राप्तिर्न भवेत्सच्चिदात्मनः तस्मा
द्ब्रह्म निदिध्यासेज्जिज्ञासुः श्रेयसे चिरं १०१ यमो हि नियमस्त्यागो मौनं देशश्च कालतः आसनं मूल
बंधश्च देहसाम्यं च दृक्स्थितिः १०२ प्राणसंयमनं चैव प्रत्याहारश्च धारणा आत्मध्यानं समाधि
श्च प्रोक्तान्यंगानि वै क्रमात् १०३ सर्वं ब्रह्मेति विज्ञानादिंद्रियग्रामसंयमः यमोयमिति संप्रोक्तोभ्य
सनीयो मुहुर्मुहुः १०४ सजातीयप्रवाहश्च विजातीयतिरस्कृतिः नियमो हि परानंदो नियमा
त्क्रियते बुधैः १०५ त्यागः प्रपंचरूपस्य चिदात्मत्वावलोकनात् त्यागो हि महतां पूज्यः सद्यो मोक्ष
मयो यतः १०६ यस्माद्वाचो निवर्तंते अप्राप्य मनसा सह यन्मौनं योगिभिर्गम्यं तद्भवेत्सर्वदा बु

७

प्रो० विसाप्तानैः १२८ भाववृत्त्या हि भावत्वं शून्यवृत्त्या हि शून्यता ब्रह्मवृत्त्या हि पूर्णत्वं तथा पूर्णत्वमभ्य
सेत् १२९ ये तु वृत्तिं विहायेमां ब्रह्माख्यां पावनीं परां ते तु वृथैव जीवंति पशुभिश्च समानराः
१३० ये तु वृत्तिं विजानंति ज्ञात्वापि वर्द्धयंति ये ते वै सत्पुरुषा धन्या वंद्यास्ते भुवनत्रये १३१ येषां
वृत्तिः समा वृद्धा परिपक्वा च सा पुनः ते वै सद्ब्रह्मतां प्राप्ता नेतरे शब्दवादिनः १३२ कुशला
ब्रह्मवार्त्तायां वृत्तिहीनाः सुरागिणः ते प्यज्ञानतया नूनं पुनरायांति यांति च १३३ निमेषार्द्धं
न तिष्ठंति वृत्तिं ब्रह्ममयीं विना यथा तिष्ठंति ब्रह्माद्याः सनकाद्याः शुकादयः १३४ कार्ये कार
णता याता कारणे न हि कार्यता कारणत्वं ततो नश्येत् कार्याभावे विचारतः १३५ अथ शुद्धं भ
वेद्वस्तु यद्वै वाचामगोचरं द्रष्टव्यं मृद्घटेनैव दृष्टांतेन पुनः पुनः १३६ अनेनैव प्रकारेण वृत्ति
र्ब्रह्मात्मिका भवेत् उदेति शुद्धचित्तानां वृत्तिज्ञानं ततः परं १३७ कारणं व्यतिरेकेण पुमानादौ वि
लोकयेत् कारणत्वं स्वतो मच्छेदवाप्तिशो भवेन्मुनिः १३८ भावितं तीव्रवेगेन यद्वस्तु निश्चयात्मना

7

७

इत्तीर्मां प्राणायामः स उच्यते ११६ निषेधनं प्रपंचस्य रेचकाख्यः समीरितः ब्रह्मैवास्मीति या वृत्तिः
पूरको वायुरीरितः ११७ ततः स द्वृत्तिनैश्चल्यं कुंभकः प्राणसंयमः अयं चापि प्रबुद्धानां अज्ञानां
घ्राणपीडनात् ११८ विषयेष्वात्मतां दृष्ट्वा मनसश्चित्तमज्जनं प्रत्याहारः स विज्ञेयो अभ्यसनीयो
मुमुक्षुभिः १२० यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् मनसो धारणं चैव धारणा सा परा मता
१२२ ब्रह्मैवास्मीति या वृत्तिः निरालंबतया स्थितिः ध्यानशब्देन विख्याता परमानंददायिनी
१२३ निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञकः व
१२४ एवं चाकृत्रिमानंदं तावत्साधु समभ्यसेत् वश्यो यावत्क्षणात्पुंसः प्रयुक्तः सन्भवेत्स्व
यम् १२५ ततः साधननिर्मुक्तः सिद्धो भवति योगिराट् तत्स्वरूपं न चैतस्य विषयो मनसो
गिराम् १२६ समाधौ क्रियमाणे तु विघ्नान्यायांति वै बलात् अनुसंधानराहित्यमालस्यं भोग
लालसम् १२७ लयस्तमश्च विक्षेपस्तेजः स्वेदश्च शून्यता एवं यद्विघ्नबाहुल्यं त्याज्यं ब्रह्म

६

यानि नैवापदो न च जरामरणेन तानि सर्वापदोपि रणि तिष्ठन्ति मो ध्येमेहु संजनस्य वपुषामिव केप्रजा

लम् ३ शाम्यामि निर्वामि परिस्थितोस्मि न यामि नो देमि न चास्तमेमि तिष्ठामि तिष्ठ स्वपथ्या स्थितास्मात्रिवं

शुभं पावनमोनमस्मि ४ मुक्ताभोगान नेकान्मुवि सकलमहीपालचूडामणिस्त्वे स्थित्वा वे[?]हो[?]ाकार्य

परमपदपदं प्राप्तवान्मत्वप्रोष: एवं रामागतेत्वप्रकलमनुस्मरन्कार्यजाते विप्रोक त्तिष्ठोतिष्ठस्व

यंवा पुरमभमनुभवन्त्यो गमोचहृदि लक्ष्मीः ५ इति महारामायणे [illegible] चारु चारु [illegible]

संसारसो[illegible] [illegible] आयुर्वेपांसि [illegible] सकलंतिमा[illegible]

३ वयस्य लाय ६ नाहं न तेहं न मम किंचिदपीति मत्वा सकलं च मे सकलमप्यहमेव चेति लब्धा

स्पदं मनसि समेव मीड्या नोत्वा स्थितं परमुपेति पदं महात्मा २ भो मम मासह[illegible] तदा

नघ [illegible] भवपदवीभ[illegible] [illegible] विभूतिपाते[illegible]

तमसत [illegible] लीति २ विज्ञान[illegible]समाधिगतात्मदीपको मनस्य[illegible]परिगलितेवधीरे ६

पुमान्स्तद्धितमवेद्धीयं ज्ञेयभ्रमरकीटवत् ॥४०॥ अहं ब्रह्मभावरूपंच सर्वमेतच्चिदात्मकं सावधानतया
नित्यं स्वात्मानं चैव भावयेत् ॥४१॥ हृदयं संहृदयस्तं नीत्वा ब्रह्माकारेण चिंत विहान्नित्य सुखे तिष्ठे
याच्चिद्रसपूर्णया ॥४२॥ एतेरंगैः समायुक्तो राजयोग उदाहृतः किंचित्पक्वकषायाणां हठयोगेन
संयुतः ॥४३॥ परिपक्वमनो येषां केवलोपंचसिद्धदः गुरुदैवतभक्तानां सर्वेषां सुलभो भवेत् ॥४४॥
9 मनरूप इति कदैव गुरुजिनको दृढ ज्ञान यायं घते तिनको प्राप्ति सुलभ मनुष्य भक्त तिनको होई केवलब्र
ह्मतु रत तुसो ई ॥४५॥ इति मत्परमहंसपरिव्राजकाचार्यविरचितायां [illegible] स्वरूपाह्लादानुभवसंग्र
होम् हरिॐनमः स्नातं तेन समस्ततीर्थसलिले सर्वापि दत्तावनिर्यज्ञानां च कृतं सहस्रम
खिलं देवाश्च संपूजिताः संसाराच्च समुद्धृताः स्वपितरः सर्वस्य पूज्योऽस्त्यसौ यस्य ब्रह्मविचारिणे क
णमपि प्राप्नोति धैर्यं मनः ॥१॥ इति दिवसमखेदं मंदरोपालकहु विरचित्तिरटजेतमोलचेष्टानिधाय न
वनृपतिविलासेतन्नसंस्कारकं वा स्फुरति हृदि विवेके राजलक्ष्मो हरंति २ऽःखानि मोत्थे विभवेन भवंति